तुङ न भवति। अज्-ग्रहणं संयोगा[1]च्समुदायनिवृत्त्यर्थम् (म. भा. १.२०६)। प्रतक्ष्य, [2]प्ररक्ष्य, ह्रस्वाश्रय[3]स्तुङ मा भूत्। तितउच्छत्रम्, 'दीर्घात्'(६.१.७५/१४८), 'पदान्ताद् वा' (६.१.७६/१४९) इति विभाषा तुङ् मा भूत्[4] (म. भा. १.२०६)। ह्रस्वदीर्घप्लुतप्रदेशाः--'ह्रस्वो नपुंसके प्रातिपदिकस्य' (१.२.४७/३१८)। 'अकृत्सार्वधातुकयोर्दीर्घः' (७.४.२५/२२९८)। 'वाक्यस्य टेः प्लुत उदात्तः' (८.२.८२/९३)[5]॥

## अचश्च। (२८/३५)

[6]परिभाषा इयं स्थानिनियमार्था। ह्रस्वदीर्घप्लुताः स्वसञ्ज्ञया शिष्यमाणा अच एव स्थाने वेदितव्याः। [7]वक्ष्यति 'ह्रस्वो नपुंसके प्रातिपदिकस्य' (१. २. ४७/३१८)[8], रै--अतिरि। नौ--अतिनु। गो--उपगु। अचः इति किम्? [9]सुवाग् ब्राह्मणकुलम्। 'अकृत्सार्वधातुकयोर्दीर्घः' (७.४.२५/२२९८)[10] --चीयते। [11]श्रूयते। अचः इति किम्? भिद्यते। छिद्यते (म. भा. १.२०५)। 'वाक्यस्य टेः प्लुत उदात्तः'(८.२.८२/९३)--[12]देवदत्त३। यज्ञदत्त३। अचः इति किम्? [13]अग्निचि३त्। सोमसु३त्। तकारस्य मा भूत्। [14]स्वसञ्ज्ञया विधाने नियमः (म. भा. १.२०६)। अच् [15]इति वर्तते। इह मा भूत्। द्यौः। पन्थाः। [16]सः। द्युभ्याम्। द्युभिः। [17]अत्र नियमो [18]नास्ति॥

## उच्चैरुदात्तः। (२९/५)

[19] अच् इति वर्तते। उदात्तादि[20]शब्दाः स्वरे वर्णधर्मे लोकवेदयोः [21]प्रसिद्धा एव। [22]ते इह तद्गुणेऽचि [23]परिभाष्यन्ते। उच्चैरुपलभ्यमानो [24]योऽच् [25]स उदात्तसञ्ज्ञो भवति। उच्चैः इति च श्रुतिप्रकर्षो न गृह्यते, उच्चैर्भाषते, [26]उच्चैः पठति इति। किं तर्हि? स्थानकृत[27]मुच्चत्वं [28]सञ्ज्ञिनो विशेषणम्। ताल्वादिषु हि [29]भागवत्सु स्थानेषु वर्णा[30]निष्पद्यन्ते। तत्र यः समाने [31]स्थाने ऊर्ध्वभागनिष्पन्नोऽ[32]च् स उदात्तसञ्ज्ञो भवति। यस्मिन्नुचार्यमाणे[33] गात्राणामायामो निग्रहो भवति, रूक्षता [34]अस्निग्धता स्वरस्य, संवृतता कण्ठविवरस्य[35] (म. भा. १.२०७)। ये। ते। [36]के। उदात्तप्रदेशाः--'आद्युदात्तश्च' (३.१.३/३७०८) इत्येवमादयः॥

## नीचैरनुदात्तः। (३०/६)

अच् इति वर्तते। नीचैरुपलभ्यमानो [37]योऽच् सोऽनुदात्तसञ्ज्ञो भवति। [38]समाने स्थाने [39]नीचभागे निष्पन्नोऽच् अनुदात्तः। यस्मिन्नुच्चार्यमाणे गात्राणामन्ववसर्गो मार्दवं [40]भवति, स्वरस्य मृदुता स्निग्धता, कण्ठविवरस्य उरुता [41]महत्ता (म. भा. १.२०७)। त्व सम सिम नेम [42]इत्यनुच्चानि। नमस्ते रुद्र नीलकण्ठ सहस्राक्ष। अनुदात्तप्रदेशाः-'अनुदात्तौ सुप्पितौ' (३.१.४/३७०९) इत्येवमादयः॥

---

1. समुदायस्य क. 2. नास्ति अ. 3. तुक् क, तु ह, तुग् अ. 4. इति इत्यधिकम् क. फ.
5. इत्येवमादयः इत्यधिकम् अ.क.ड.फ.ह. 6. वाक्यमिदं नास्ति फ.ग.ह. 7. वक्ष्यति नास्ति ह. 8. इति इत्यधिकम् फ.
9. सुवाग ह. 10. इति दीर्घः इत्यधिकम् ग. 11. स्तूयते अ. उ, सूयते क. 12. देवदत्त ३नं ह, यज्ञदत्त३नास्ति ड.
13. अतिश्वी३त् ह. 14. संज्ञया क. ड. 15. हि अ. 16. इयम् फ. 17. वाक्यमिदं नास्ति क. फ. ह. 18. न
भवति ग. 19. अच्—वर्तते नास्ति ह. 20. शब्दा नास्ति क. ड. 21. प्रसिद्ध क. ड. 22. ते नास्ति अ. फ, स क.
23. विपरिभाष्यते ह. 24. यो नास्ति ह. 25. स नास्ति फ. 26. नीचैः भाषते ह. 27. उच्चैस्त्वं ह.
28. संज्ञिन उदात्तस्य ड. 29. भगवत्सु ह. 30. निषद्यंते ह. 31. स्थाने नास्ति फ. 32. अच् नास्ति ह.
33. उच्चार्यमाण आयामो गात्राणाम् ब. क, आयमः ब, आयामः नास्ति ह. 34. अस्निग्धता नास्ति क. ड.
35. कण्ठविहारस्य ग, च इति ह, इति क. 36. के नास्ति ह. 37. यो सो नास्ति अ. क. फ.
38. समानस्थाने क. 39. नीचभागनिष्पन्नः ब. क. फ. ड, नीचैर्भागनिष्पन्नः ह. 40. भवति नास्ति ह.
41. महत्त्वं फ. ग. 42. इति समुच्चानि ब.